# Ashtadiggajakrita Manidhamalinga Stuti

# અષ્ટદિગ્ગજકૃતા મણિધામલિઙ્ગસ્તુતિઃ

## Document Information

Text title : Ashtadiggajakrita Manidhamalinga Stuti

File name : aShTadiggajakRRitAmaNidhAmalingastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 30 | vAvRittashlokAH ||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# અષ્ટદિગ્ગજકૃતા મણિધામલિઙ્ગસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)
ઐરાવતઃ (ઉવાચ)
શાન્તં શઙ્કુમતઙ્ગકાન્તકમુમાકાન્તં ભજામ્યન્તિક-
સ્વાન્તાનન્તમહાન્તકોદ્ભવભયં કિં વોપલક્ષ્યં મમ ।
વિશ્વાધીશ્વર શાશ્વતાન્ધકહરાપારવ્યથાસંહર
ઘોરાપારભવોરુસાગરગદાપારાદિ દુઃખં હર ॥ ૯॥

પુણ્ડરીકઃ (ઉવાચ)
પાહિ ત્રિણેત્ર સુચરિત્ર પવિત્રગાત્રં
પાહ્યબ્જમિત્રનયનામલભૂતિગાત્ર ।
મામીશશઙ્ખધવલેન્દુકલાલલામ
પાહીશ મામકધિયા સકલેષુ મિત્ર ॥ ૧૪॥

વામનઃ (ઉવાચ)
પાહીન્દિરારમણકારણ તારણેડ્ય
ચક્ષુઃશ્રવાભરણ કારણહીન શમ્ભો ।
મારાઙ્ગસંહરણ પાપનિવારણેશ
પાહીન્દુભૂષણમહેશ ગણાગ્રગણ્ય ॥ ૧૯॥

કુમુદઃ ઉવાચ ।
હે દેવદેવ જગદીશ્વર પઞ્ચવક્ત્ર
વિશ્વમ્ભરાધરણભૂષણ ભીષણેશ ।
ગૌરીમનોરમણ સર્વશરણ્ય શમ્ભો
આતાર્ય તારણ વિભો ચરણં નતોઽસ્મિ ॥ ૨૩॥

અઞ્જનઃ (ઉવાચ)
સરસીરુહનાભવેદ(વેત્તૃ)વન્દ્યં
સ્ફુરશમ્બરવૈરિલાઞ્છનાર્કમ્ ।

(વરશમ્બરવૈરિસંહરં હરં તમ્) ।
ભજ ભજ મનસા શિવાધવાં ત્વં
ભવહરમભયાય ચેતસા ત્વમ્ ॥ ૨૭॥

પુષ્પદન્તઃ (ઉવાચ)
કુરુ કુરુ કરુણાં શશધરશિશુધર
અતિભયબહુભીતનાગલોકરક્ષમ્ ।
શશિહુતવહભાનુનેત્રમદ્રીશ-
પ્રિયતનયાનયનાબ્જ ભાસ્કરં વન્દે ॥ ૩૧॥

સાર્વભૌમઃ ઉવાચ ।
શઙ્ગં સઙ્ગહરં મહેશમનઘં માતઙ્ગચર્મામ્બરમ્ ।
ગઙ્ગાતુઙ્ગતરઙ્ગરઙ્ગિત જટાભારં ભુજઙ્ગાઙ્ગદમ્ ॥ ૩૫॥

મધુમથનાક્ષપદામ્બુજં મહેશં ।
ભજ શમ્ભું ભવબન્ધવિમોચનાય ॥ ૩૬॥

સુપ્રતીકઃ (ઉવાચ)
શ્રીકાલકાલ જિતસર્વદિતિપ્રસૂત
પાતાલમૂલપદખેલન વિશ્વલીલ ।
પાહ્યબ્જજાચ્યુતશચીધવપૂજિતાઙ્ઘ્રે
ગૌરીમનોહર વિલાસનિધાનશીલ ॥ ૪૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે અષ્ટદિગ્ગજકૃતા મણિધામલિઙ્ગસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૩૦ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 30 . vAvRRittashlokAH ..

Notes:
Aṣṭadiggajāḥ અષ્ટદિગ્ગજાઃ; that include Airāvata ઐરાવત, Puṇḍarīka પુણ્ડરીક, Vāmana વામન, Kumuda કુમુદ, Añjana અઞ્જન, Puṣpadanta પુષ્પદન્ત, Sārvabhauma સાર્વભૌમ, Supratīka સુપ્રતીક, eulogize Śiva શિવ via Śivaliṅga-s શિવલિઙ્ગાઃ that they had established in the Maṇidhāma મણિધામ with respective names in the corresponding eight directions Aṣṭadik અષ્ટદિક્ - viz. Pūrve Airāvateśvaram પૂર્વે ઐરાવતેશ્વરમ્, Āgneyāṃ Puṇḍarīkeśvaram આગ્નેયાં પુણ્ડરીકેશ્વરમ્, Dakṣiṇe Vāmaneśam દક્ષિણે વામનેશમ્, Nairṛtyāṃ Kumudeśam નૈરૃત્યાં કુમુદેશમ્, Paścime

Añjaneśam પશ્ચિમે અઞ્જનેશમ્, Vāyavyāṃ Puṣpadanteśvaram વાયવ્યાં પુષ્પદન્તેશ્વરમ્, Uttare Sārvabhaumeśvaram ઉત્તરે સાર્વભૌમેશ્વરમ્, Aiśānyaṃ Supratīkeśvaram, ઐશાન્યં સુપ્રતીકેશ્વરમ્.

Proofread by Ruma Dewan

---

*Ashtadiggajakrita Manidhamalinga Stuti*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*